# स्कन्दकवचं

ओं अस्य श्रीस्कन्दसुब्रह्मण्यकवचस्य परब्रह्मः ऋषिः देवी गायत्रि छन्दः श्री सुब्रह्मण्यो देवता सौं बीजं श्रीं शक्तिः क्लीं कीलकं मम सुब्रह्मण्य प्रसादसिद्ध्यर्थे इष्ट काम्यार्थे भोगमोक्षार्थे जपे विनियोगः

**करन्यासः**

ओं श्रीं शरवणभव स्कन्दाय अंगुष्ठाभ्यां नमः
ओं क्लीं रवणभवश सनत्कुमाराय तर्जनीभ्यां नमः
ओं ह्रीं वणभवशर षण्मुखाय मध्यमाभ्यां नमः
ओं ऐं सौं णभवशरव सेनाधिपतये अनामिकाभ्यां नमः
ओं रं भवशरवण सुब्रह्मण्याय कनिष्ठिकाभ्यं नमः
ओं नं लं वशरवणभ शक्तिहस्ताय करतलकरपृष्ठाभ्यां नमः

**हृदयादि न्यासः**

ओं श्रीं शरवणभव स्कन्दाय हृदयाय नमः
ओं क्लीं रवणभवश सनत्कुमाराय शिरसे स्वाहः
ओं ह्रीं वणभवशर षण्मुखाय शिखायै वषट्
ओं ऐं सौं णभवशरव सेनाधिपतये कवचाय वौषट्
ओं रं भवशरवण सुब्रह्मण्याय फट्
ओं नं लं वशरवणभ शक्तिहस्तायेदि दिग्बन्धः

**ध्यानं**

सिन्दूरारुणमिन्दुकान्तिवदनं केयूरहारादिभिः
दिवैराभरणैर्विभूषिततनुं स्वर्गस्यसौख्यप्रदं
अंभोजाभयशक्तिकुक्कुटधरं रक्तांगरागोज्ज्वलं
सुब्रह्मण्यमुपास्महे प्रणमताभीतिप्रणाशोद्यतं

## मन्त्रं
ओं श्रीं ह्रीं ऐं सौं रं नं लं शरवणभव षण्मुखाय नमः

## कवचं
शिखां रक्षेत् कुमारं च कर्त्तिकेय शिरस्तथा
ललाटं पार्वतीसूनुम् विशाखो भ्रूयुगं तथा 1

नेत्रे च क्रौञ्चभेदी च नासिकां शिखिवाहनः
शक्तियुक्तस्थथा कर्णौ कर्णमूले षडाननः 2

ओष्ठद्वयं च सेनानि रसनां तारकापहः
दन्तं गुह सदा पातु गांगेयश्चिबुकं तथा 3

कण्ठं भवोद्भवः पातु वाचं वै शंभुनन्दनः
पार्वतीनन्दनो ग्रीवं बहिःकण्ठं तथाग्निभूः 4

नासिकां बाहुलेयस्तु स्कन्ध षाण्मातुरस्तथा
विशाखो बाहुयुग्मं तु हस्तौ पातु वणिक् तथा 5

विनायकानुजः पातु चांगुली नखशालिखः
सुब्रह्मण्यस्सदा कक्षौ कुक्षिं रक्षेत् स्सुरारिहा 6

वैगण्डं च तथा ज़ेयस्तनौ रक्षेज्जगद्विभुः
हृदयं युद्धशूरस्तु मनः कारुण्यवारिधिः 7

उदरं मे मनश्चारि कटिं भक्तैकवत्सलः
नाभिः श्रीपरमाचार्यो योनिं वा वाञ्छितप्रदः 8

गुह्यं शशिधरः पातु शिपिक्षेपं शरीफधृक्
ऊरूद्वयादुमासूनु-र्जानुनी वह्निकाप्रियः 9

जंखे पातु धनाध्यक्षो पादगुल्फौ महाबलः
पादौ रक्षतु पापघ्नं स-र्वांगं कुक्कुटध्वजः 10

वपा मज्जास्थिरक्तत्वक्मेधोश्शुद्धास्सदत्तवत्
देवचुडामणिः पातु मकुतं पद्मगोचरं 11

महापराक्रमः पातु कप-र्दी शंभुनन्दनः
शिवानन्दो निधिस्थानं बुद्ध्यादीमुनिसेवितः 12

प्राणादिपायू-न् स-र्वज्ञः षड्वक्त्रस्तु सदावतु
लक्ष्मीकी-र्त्ति-र्गुणा-न् गोत्रं भार्या-न् पुत्रा-न् विभुस्तथा 13

तथाज्ञामलयःपातु स-र्वदेवाभयप्रदः
स्थलं यन्त्रक्षणं शून्यं कवचेन विव-र्ज्जितं 14

तत्स-र्व्वं रक्षतुः पायो नित्यं यौवनगोचरं
काम्या-र्थस्य सदा सिद्धिः कवचस्मरणात् भवेत् 15

संग्रामे जयलाभश्च स-र्वेषां जयकारणं
भूतपेतपिशाचादिशून्यदुष्कृतनाशनं 16

पू-र्व्वादिस-र्व्वदिक्मद्ध्ये रक्षितां शक्तिवल्लभः
अभिचाराद्यशून्यादि पठनान्नष्टमाप्नुयात् 17

इति स्कन्द कवचं नित्यंअय्ह् पठेत् शृणुयादपि
स-र्व्वभाग्यानि संप्राप्य शिवसायूज्यमाप्नुयात् 18

अस्तु तुभ्यं महापुण्यं सर्वप्राणि प्रियङ्करं
जपमात्रेण पापघ्नं सर्वकामफलप्रदं 19

मुनीन्द्राणामिदं देवं सर्वपीडा निवारणं
स्कन्दस्य कवचो सेव्या पठनात् व्याधिनाशनं 20

अग्निबाधाप्रशमनं चोरोपद्रवनाशनं
पिशाचभूतरोगाणां स्मरणादेव शान्ति कृत् 21

ईरितं स्कन्दकवचं हृदये धारितं जनैः
तेषां दारिद्यदुरितं न कदाचित् भविष्यति 22

भुवि साम्राज्यसम्पत्तिरन्ते कैवल्यमाप्नुयात्
सदायुष्यं भवेत् सत्यं स्कन्दभक्तिश्च जायते 23

**इति स्कन्दपुराणे स्कन्दकवचं सम्पूर्णं**